श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ चतुरशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुरशीतितमः सर्गः ॥

## विभीषणेन श्रीरामं प्रतीन्द्रजितो मायाया रहस्यं वर्णयित्वा सीता जीवतीति विश्वासस्य दृढीकरणं लक्ष्मणं च निकुम्भिलां गमयितुं प्रार्थनम्

राममाश्वासमाने तु लक्ष्मणे भ्रातृवत्सले।
निक्षिप्य गुल्मान् स्वस्थाने तत्रागच्छद् विभीषणः॥ **6.84.1** ॥

नानाप्रहरणैर्वीरैश्चतुर्भिरभिसंवृतः।
नीलाञ्जनचयाकारैर्मातङ्गैरिव यूथपैः॥ **6.84.2** ॥

सोऽभिगम्य महात्मानं राघवं शोकलालसम्।
वानरांश्चापि ददृशे बाष्पपर्याकुलेक्षणान्॥ **6.84.3** ॥

राघवं च महात्मानमिक्ष्वाकुकुलनन्दनम्।
ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम्॥ **6.84.4** ॥

व्रीडितं शोकसन्तप्तं दृष्ट्वा रामं विभीषणः।
अन्तर्दुःखेन दीनात्मा किमेतदिति सोऽब्रवीत्॥ **6.84.5** ॥

विभीषणमुखं दृष्ट्वा सुग्रीवं तांश्च वानरान्।
लक्ष्मणोवाच मन्दार्थमिदं बाष्पपरिप्लुतः॥ **6.84.6** ॥

हता इन्द्रजिता सीता इति श्रुत्वैव राघवः।
हनूमद्वचनात् सौम्य ततो मोहमुपाश्रितः॥ **6.84.7** ॥

कथयन्तं तु सौमित्रिं सन्निवार्य विभीषणः।
पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत्॥ **6.84.8**॥

मनुजेन्द्रार्तरूपेण यदुक्तस्त्वं हनूमता।
तदयुक्तमहं मन्ये सागरस्येव शोषणम्॥ **6.84.9**॥

अभिप्रायं तु जानामि रावणस्य दुरात्मनः।
सीतां प्रति महाबाहो न च घातं करिष्यति॥ **6.84.10**॥

याच्यमानः सुबहुशो मया हितचिकीर्षुणा।
वैदेहीमुत्सृजस्वेति न च तत् कृतवान् वचः॥ **6.84.11**॥

नैव साम्ना न दानेन न भेदेन कुतो युधा।
सा द्रष्टुमपि शक्येत नैव चान्येन केनचित्॥ **6.84.12**॥

वानरान् मोहयित्वा तु प्रतियातः स राक्षसः।
मायामयीं महाबाहो तां विद्धि जनकात्मजाम्॥ **6.84.13**॥

चैत्यं निकुम्भिलामद्य प्राप्य होमं करिष्यति।
हुतवानुपयातो हि देवैरपि सवासवैः॥ **6.84.14**॥

दुराधर्षो भवत्येष सङ्ग्रामे रावणात्मजः।
तेन मोहयता नूनमेषा माया प्रयोजिता॥ **6.84.15**॥

विघ्नमन्विच्छता तत्र वानराणां पराक्रमे।
ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते॥ **6.84.16**॥

त्यजैनं नरशार्दूल मिथ्या सन्तापमागतम्।
सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितम्॥ **6.84.17**॥

इह त्वं स्वस्थहृदयस्तिष्ठ सत्त्वसमुच्छ्रितः।
लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः॥ **6.84.18**॥

एष तं नरशार्दूलो रावणिं निशितैः शरैः।
त्याजयिष्यति तत्कर्म ततो वध्यो भविष्यति॥ **6.84.19** ॥

तस्यैते निशितास्तीक्ष्णाः पत्रिपत्राङ्गवाजिनः।
पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितम्॥ **6.84.20** ॥

तत् सन्दिश महाबाहो लक्ष्मणं शुभलक्षणम्।
राक्षसस्य विनाशाय वज्रं वज्रधरो यथा॥ **6.84.21** ॥

मनुजवर न कालविप्रकर्षो
  रिपुनिधनं प्रति यत्क्षमोऽद्य कर्तुम्।
त्वमतिसृज रिपोर्वधाय वज्रं
  दिविजरिपोर्मथने यथा महेन्द्रः॥ **6.84.22** ॥

समाप्तकर्मा हि स राक्षसर्षभो
  भवत्यदृश्यः समरे सुरासुरैः।
युयुत्सता तेन समाप्तकर्मणा
  भवेत् सुराणामपि संशयो महान्॥ **6.84.23** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुरशीतितमः सर्गः॥